"अहो नृजन्माखिलजन्मशोभनं
किं जन्मभिस्त्वपरैरप्यमुष्मिन् ।
न यत् हृषीकेशयशःकृतात्मनां
महात्मनां वः प्रचुरः समागमः ॥")

प्रचुरपुरुषः, पुं, (प्रचोरतीति । प्र+चुर कि स्तेये +कः । प्रचुरश्चासौ पुरुषश्चेति ।) चौरः । इति त्रिकाण्डशेषः ॥ (प्रचुरो बहुलः पुरुषश्चेति कर्म्मधारये ।) बहुनरश्च ॥

प्रचेतसी, स्त्री, (प्रचेतयति मूर्च्छितमिति । प्र+चित्+णिच्+असच् । गौरादित्वात् ङीष् ।) कट्फलः । इति राजनिर्घण्टः ॥ प्रचेतसः कन्या च ॥

प्रचेता, [ ऋ ] पुं, (प्रचेतति युद्धादिस्थाने वीरान् सञ्चिनोतीति । प्र+चित्+तृच् ।) सारथिः । इति हेमचन्द्रः ॥

प्रचेताः, [ स् ] पुं, (प्रचेततीति । प्र+चित+असुन् ।) वरुणः । इत्यमरः । १ । १ । ६४ ॥ (यथा, रघौ । १ । ८० ।
"हविषे दीर्घसत्त्रस्य सा चेदानीं प्रचेतसः ।
भुजङ्गपिहितद्वारं पातालमधितिष्ठति ॥"
मुनिविशेषः । (यथा, मनौ । १ । ३५ ।
"मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ।
प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च ॥"
प्रकृष्टं चेतोऽस्य ।) प्रकृष्टहृदि, त्रि । इति मेदिनी ॥ प्राचीनबर्हिराजपुत्त्रः । यथा,—
"प्राचीनबर्हिर्भगवान् सर्व्वशस्त्रभृतांवरः ।
समुद्रतनयायां वै दश पुत्त्रानजीजनत् ॥
प्रचेतसस्ते विख्याता राजानः प्रथितौजसः ॥"
इति कौर्म्मे १२ अध्यायः ॥
अपि च ।
"प्राचीनबर्हिस्तत्पुत्त्रः पृथिव्यामेकराड्बभौ ।
उपयेमे समुद्रस्य लवणस्य स वै सुताम् ॥
तस्मात् सुषाव सामुद्री दश प्राचीनबर्हिषः ।
सर्व्वे प्रचेतसो नाम धनुर्व्वेदस्य पारगाः ॥
अपृथग्धर्म्मचरणास्तेऽतप्यन्त महत्तपः ।
दश वर्षसहस्राणि समुद्रसलिले शयाः ॥
प्रजापतित्वं संप्राप्य भार्य्या तेषाञ्च मारिषा ।
अभवद्भवशापेन तस्यां दक्षोऽभवत् ततः ॥"
इति गारुड़े ६ अध्यायः ॥
(प्रकृष्टज्ञानयुक्ते, त्रि । यथा, ऋग्वेदे ।२।२३।२।
"देवाश्चित् ते असुर्य्यप्रचेतसो बृहस्पते यज्ञियं
भागमानशुः ॥"
"हे बृहस्पते ! प्रचेतसः प्रकृष्टज्ञानास्ते त्वदीया देवाश्चिद् देवा अपि ।" इति तद्भाष्ये सायनः ॥ )

प्रचैलं, क्ली, (प्रचेलतीति । प्र+चेल्+अच् ।) पीतकाष्ठम् । इति शब्दचन्द्रिका ॥

प्रचेलकः, पुं, (प्रकर्षेण चेलति गच्छतीति । प्र+चेल्+ण्वुल् ।) घोटकः । इति शब्दमाला ॥

प्रचोदनी, स्त्री, (प्रचोद्यते रोगो ययेति । प्र+चुद्+णिच्+ल्युट् । ङीप् ।) कण्टकारी । इत्यमरः । २ । ४ । ९४ ॥

प्रचोदितः, त्रि, (प्र+चुद्+क्तः ।) प्रेरितः । यथा,—
"प्रचोदिता येन पुरा सरस्वती ।"
इति श्रीभागवते २ स्कन्धे ४ अध्यायः ॥

प्रच्छ, औ ग्न ज्ञीप्से । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-द्विक०-अनिट् ।) ज्ञीप्सा ज्ञातुमिच्छा । ज्ञप कम इत्यस्यैव ज्ञानपक्षे निष्पादनात् । औ, अप्राक्षीत् । ग्न, पृच्छति वार्त्तां गुरुं शिष्यः । इति दुर्गादासः ॥

प्रच्छदः, पुं, (प्रच्छाद्यतेऽनेनेति । प्र+छद+णिच्+करणे घः । "छादेर्घेऽद्व्युपसर्गस्य ।" ६ । ४ । ९६ । इति उपधाया ह्रस्वः ।) आच्छादनम् । इति शब्दरत्नावली ॥ (यथा, रघुः । १९ । २२ ।
"प्रच्छदान्तगलिताश्रुबिन्दुभिः
क्रोधभिन्नवलयैर्व्विवर्त्तनैः ॥")

प्रच्छदपटः, पुं, प्रकर्षेण छाद्यतेऽनेन स चासौ पटश्चेति । आच्छादनपटः । पाछुड़ि इति ख्यातः । तत्पर्य्यायः । निचोलः २ । इत्यमरः ।२।६।११६॥ निचुलः ३ । इति व्याड़िः ॥ निचोलम् ४ । इति रभसः ॥ निचोली ५ । इति राजदेवः ॥ इत्यमरटीकायां भरतः ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"वलीभङ्गाभोगैरलकपतितैः शीर्णकुसुमैः
स्त्रियाः सर्व्वावस्थं कथयति रतं प्रच्छदपटः ॥")

प्रच्छना, स्त्री, (प्रच्छ+बाहुलकात् युच् । टाप् ।) आमन्त्रणा । इति जटाधरः ॥

प्रच्छन्नं, क्ली, (प्र+छद्+क्त ।) अन्तर्द्वारम् । इत्यमरः । २ । २ । १४ ॥ आच्छन्ने, त्रि ॥ (यथा, महाभारते । ३ । ७१ । ३१ ।
"प्रच्छन्ना हि महात्मानश्चरन्ति पृथिवीमिमाम् ॥")

प्रच्छर्दिका, स्त्री, (प्र+छर्द वमने+"रोगाख्यायां ण्वुल् बहुलम् ।" ३ । ३ । १०८ । इति ण्वुल् । स्त्रियां टापि अत इत्वम् ।) वमिः । इत्यमरः । २ । ६ । ५५ ॥ (वमनकारके, त्रि ॥ )

प्रच्छादनं, क्ली, (प्रच्छाद्यतेऽनेनेति । प्र+छद्+णिच्+ल्युट् ।) उत्तरीयवस्त्रम् । तत्पर्य्यायः । प्रावरणम् २ संव्यानम् ३ उत्तरीयकम् ४ । इति हेमचन्द्रः । ३ । ३३५ ॥ (नेत्रच्छदम् । यथा, अश्ववैद्यके । २ । १० ।
"प्रच्छादनं भवेदस्य चाचिकूटमतः परम् ॥"
"वर्त्म नेत्रच्छदं प्रच्छादनं प्रच्छादनापरनामकं भवेत् । वर्त्म नेत्रच्छदेऽध्वनीत्यमरः ॥" इति तट्टीका ॥ भावे ल्युट् । गोपनम् । यथा, महाभारते । १ । १६१ । १७ ।
"आत्मप्रच्छादनार्थं वै बाहुवीर्य्यमुपाश्रितः ।
विप्ररूपं विधायेदं मन्ये मां प्रति युध्यसे ॥")

प्रच्छादितं, त्रि, (प्र+छद+णिच्+क्तः ।) आच्छादितम् । इति हलायुधः ॥

प्रजः, पुं, (प्रजायते जायागर्भे इति । प्र+जन्+डः ।) पतिः । "जायायां प्रविश्य पुनर्जायते इति डे प्रजः पतिः ।" इति प्रजावतीशब्दटीकायां भरतः ॥

प्रजनः, पुं, (प्रजायतेऽनेनेति । प्र+जन्+करणे घञ् । "जनिवध्योश्च ।" ७ । ३ । ३५ । इति न वृद्धिः ।) उपसरः । इत्यमरः । ३ । २ । २५ ॥ हे स्त्रीगवादिषु पुङ्गवादीनां प्रथमगर्भाधानाय मैथुनाभियोगः । प्रजनं क्लीवमिति केचित् ॥ पशूनां गर्भग्रहणकालः । इति स्वामी ॥ गवां प्रथमगर्भग्रहणाभियोगः । इति सुभूतिः ॥ स्त्रीगवीषु पुङ्गवानां प्रथमगमनमिति सर्व्वस्वम् ॥ किन्तु वीनामुपसरं इच्छति भट्टिः । इत्यमरटीकायां भरतः ॥ (मैथुनसाधनोपस्थेन्द्रियम् । यथा, मनुः । १२ । १२१ ।
"वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम् ॥"
प्र+जन्+भावे घञ् । पुत्त्रोत्पादनम् । यथा, मनुः । ९ । १२१ ।
"उपसर्ज्जनं प्रधानस्य धर्म्मतो नोपपद्यते ।
पिता प्रधानं प्रजने तस्माद्धर्म्मेण तं भवेत् ॥"
जनयितरि, त्रि । यथा, भागवते । ८ । ५ । ३४ ।
"ईशो नगानां प्रजनः प्रजानां
प्रसीदतां नः स महाविभूतिः ॥"
तथा, भगवद्गीतायाम् । १० । २८ ।
"प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥")

प्रजननं, क्ली, (प्रजायतेऽनेनेति । प्र+जन्+ल्युट् ।) योनिः । (यथा, सुश्रुते । १ । २३ ।
"स्फिक्पायुप्रजननललाटगण्डौष्ठपृष्ठकर्णफलकोषोदरजत्रुमुखाभ्यन्तरसंस्थाः सुखरोपणीयव्रणाः ॥" प्र+जन्+भावे ल्युट् ।) जन्म । इति मेदिनी । ने, १६१ ॥ (यथा, राजतरङ्गिण्याम् । २ । ६१ ।
"वेधाः परां धुरमुपैति परीचकाणा-
मिच्छोः फलप्रजननेन कृतश्रमो यः ॥"
धात्रीकर्म्म । यथा, सुश्रुते शारीरस्थाने । १० अध्याये । "ततः क्षौमोपधाने मृदुविस्तीर्णे शयने स्थितामाभुग्नसक्थीमुत्तानामशङ्कनीयाश्चतस्रः स्त्रियः परिणतवयसः प्रजननकुशलाः कर्त्तितनखाः परिचरेयुरिति ॥") प्रगमः । इति विश्वः ॥ (यथा, महाभारते । १ । १२० । ३७ ।
"तस्मात् प्रहेष्याम्यद्य त्वां हीनः प्रजननात्
स्वयम् ।
सदृशाच्छ्रेयसो वा त्वं विद्ध्यपत्यं यशस्विनि ! ॥"
प्रजनयतीति । प्र+जन+क्तुः । प्रजोत्पादके, त्रि । यथा, वाजसनेयसंहितायाम् । १९ । ४८ ।
"इदं हविः प्रजननं मेऽस्तु ॥")

प्रजनिका, स्त्री, (प्रजनयतीति । प्र+जन+णिच्+ण्वुल् । टापि अत इत्वम् ।) माता । इति जटाधरः ॥

प्रजल्पः, पुं, (प्र+जल्प+भावे घञ् ।) वाक्यविशेषः । यथा,—
"असूयेर्ष्यामदयुजा योऽवधीरणमुद्रया ।
प्रियस्य कौशलोद्गारः प्रजल्पः स तु कथ्यते ॥"
इत्युज्ज्वलनीलमणिः ॥